**19E**

# टिळक महाराष्ट्र विद्यापीठ, पुणे

**संस्कृत विशारद (बी.ए.) – बहिःस्थ**

**परीक्षा : जानेवारी – २०२३**

**सत्र ४ थे**

**विषयः ऐतिहासिक काव्ये (19E446)**

| दिनांक : १८/०१ /२०२३ | गुण :८० | वेळ : स. १०.०० ते १.०० |
|---|---|---|

**सूचना :** सर्व प्रश्न अनिवार्य

**प्र.१.अ) एकं परिच्छेदं माध्यमभाषया अनुवदत –** (१५)

१) विवेश च सहसा केसरीव गिरिगुहागृहं गभीरहृदयं भयङ्करः कोपावेगः। केशिनिषूदनशङ्काकुलकालियभङ्गुरभ्रूभङ्गतरङ्गिणी श्यामायमाना यमस्वसेव प्रथीयसी ललातपट्टे भीषणा भ्रुकुटिः उदभिद्यत। दर्पात्परामृशन् नखकिरणसलिलनिर्झरैः समरभारसम्भावनाभिषेकम् इव चकार दिङ्नागकुम्भकूटविकटस्य बहुशिरकोशस्य वामः पाणिपल्लवः। संगलत्स्वेदसलिलपूरितोदरो निर्मूलं मालवोन्मूलनाय गृहीतकेश इव दुर्मदश्रीकचग्रहोत्कण्ठयेव च कम्पमानः पुनरपि समुत्ससर्प भीषणं कृपाणं पाणिरपरः।

२) अथ तच्छ्रुत्वा निशितशिखेन शूलेनेवाहतः प्रविदीर्णहृदयो देवो हर्षः समचिन्तयत्– किं नु खलु मामन्तरेणार्थः केनचिदसहिष्णुना किञ्चिद्ग्राहितः कुपितः स्यात्। उतानया दिशा परीक्षितुकामो माम्। उत तातशोकजन्मा चेतसः समाक्षेपोऽयमस्य। आहोस्विदार्य एवायं न भवति, किं वार्येणान्यदेवाभिहितमन्यदेवाश्रावि मया शोकशून्येनेव श्रवणेन्द्रियेण। आर्यस्य चान्यद्विवक्षितमन्यदेवापतितं मुखेन।

**प्र.१.आ) श्लोकद्वयं माध्यमभाषया अनुवदत–** (१०)

१) पिष्टं पिष्टपुरं येन जातं दुर्गमदुर्गमम्। चित्रं यस्य कलेर्वृत्तं जातं दुर्गमदुर्गमम्।।

२) गङ्गाळुपेन्द्रा व्यसनानि सप्त हित्वा पुरोपार्जितसम्पदोऽपि। यस्यानुभावोपनताःसदासन्नासन्नसेवामृतपानशौण्डाः।।

३) तदनु चिरपरिमेश्चलुक्यकुलविपुलजलनिधिर्जयति। पृथिवीमौलिललाम्नां यः प्रभवः पुरुषरत्नानाम्।।

**प्र.२.अ) टिप्पणीमेकां लिखत।** (२०)

१) राज्यवर्धनस्य परिचारकाः।

२) स्कन्दगुप्तस्य हर्षं प्रति आगमनम्।

३) आरम्भश्लोकौ।

**प्र.२.आ) टिप्पणीद्वयं लिखत।** (२०)

१) प्रशस्तिकाव्यस्य महत्त्वम्।

२) ऐहोळेलेखस्य महत्त्वम्।

**प्र.३.अ) ससन्दर्भं वाक्यत्रयं स्पष्टीकुरुत।** (१५)

१) तदियमात्मदेशाचारीचिता स्वभावसरलहृदयजा त्यज्यतां सर्वविश्वासिता।

२) शपामार्यस्यैव पादपांसुस्पर्शेन।

३) क्वेदानीं यास्यति दुर्बुद्धिः?

४) वृत्तेऽस्मिन्महाप्रलये धरणीधारणायाधुना त्वमेव शेषः।

**प्र.३.आ) ससन्दर्भं वाक्यद्वयं स्पष्टीकुरुत।** (१५)

१) अविहितयाथासङ्ख्यो जयति स सत्याश्रयः सुचिरम्।

२) प्राकारान्तरितप्रतापमकरोद्यः पल्लवानां पतिम्।

३) भयविगळितहर्षो येन चाकारि हर्षः।

----------